International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(2): 20-23
© 2016 IJSR
www.anantaajournal.com
Received: 23-01-2016
Accepted: 26-02-2016

**उमेश चन्द्र जोशी**
शोधच्छात्र, संस्कृतविभाग,
दिल्ली विश्वविद्यालय, दिल्ली

**Correspondence**
**उमेश चन्द्र जोशी**
शोधच्छात्र, संस्कृतविभाग,
दिल्ली विश्वविद्यालय, दिल्ली

# कविशिक्षाग्रन्थानां शोध-सर्वेक्षणम्

**उमेश चन्द्र जोशी**

## भूमिका

संस्कृतकाव्यशास्त्रस्य शाखाविशेषे कविशिक्षापरम्परा स्थानं भजते। "कविशिक्षा" इति पदस्याभिप्राय:-कविभ्य: शिक्षा, कवीनां कृते शिक्षा, कविविषयिणी वा शिक्षा इत्यस्ति। काणे महोदयानुसारं[1]केषुचित ग्रन्थेषु काव्यरचनां विषयीकृत्य कवीनां कृते व्यवहारिकी सूचना प्रदीयते ते ग्रन्था: कविशिक्षाप्रद- ग्रन्था: कथ्यन्ते। यद्यपि शाखाविशेषत्वेन परम्परा इयं राजशेखरत: समारब्धा दृश्यते तथापि भरत-भामह[2]-दण्डि[3]-आनन्धवर्धन[4]-ममटादीनाञ्च[5] ग्रन्थेषु इयं कविशिक्षा बीजरुपेण प्राक् निहितासीत्। कविशिक्षाग्रन्थेषु राजशेखरकृता-काव्यमीमांसा", क्षेमेन्द्रकृतं-कविण्ठाभरणम्", अमरचन्द्रयतिविरचिता-काव्यकल्पलतावृत्ति:", विनयचन्द्र-कृताकविशिक्षा, चेत्यादय: ग्रन्था: साक्षाद्रूपेण कविशिक्षाया: प्रतिपादनं कुर्वन्ति। केशवमिश्रकृत:- अलंकारशेखरोपि चानुषङ्गत: कविशिक्षां प्रतिपादयति। पत्रेऽस्मिन्नपि संस्कृतवाङ्मये कविशिक्षा-सन्दर्भित-शोधकार्याणां तथा च कवि-शिक्षा ग्रन्थेषु यथोपलब्धानां शोधकार्याणां सर्वेक्षणं प्रस्तूयते

**" कालक्रमानुसारेण कविशिक्षाचार्या: तद्ग्रन्थाश्च "**

**१राजशेखरविरचिता"काव्यमीमांसा"**

काव्यमीमांसा कविशिक्षाया: प्रमुख: महत्त्वपूर्णश्च ग्रन्थो वर्तते। अष्टादशाध्यायेषु विभक्तेऽस्मिन् ग्रन्थे विविधा:कविशिक्षाया: विषया: सन्ति। तथाचेत्यस्मिन् कवीनां कृते व्यवहारिकी सूचनापि वर्तते। ग्रन्थेस्मिन् शास्त्र-संग्रह:, शास्त्र-निर्देश:, काव्यार्थयोनि, काव्यपुरुषोत्पत्ति:,पदवाक्यविवेक:, कविचर्यादय: विषया: वर्णिता: सन्ति। राजशेखरस्य काल: प्राय: दशम शतकस्य पूर्वाध:[6] स्वीक्रियते। यतोहि प्रतिहारवंशीयनृप: महेन्द्रपाल: राजशेखरस्य शिष्य: आसीत्।

**२ "क्षेमेन्द्रस्य कविकण्ठाभरणम्"-**

कविकण्ठाभरणम्' कविशिक्षाया: लघु-ग्रन्थोऽस्ति। पञ्चसन्धिषु पञ्चपञ्चाशतकारिकासु चोपनिबधेऽस्मिन् ग्रन्थे कविशिक्षाया: बहव:सिद्धान्ता: प्रतिपादिता: सन्ति। यथा- अकवे: कवित्वप्राप्ति: शिक्षाप्राप्तगिर: कवे:। चमत्कृतिश्च शिक्षाप्तौ गुणदोषगतिस्तत:॥ पश्चात् परिचय: प्राप्ति: इत्येते पञ्चसन्धय:[7]। एकादश शतकस्यचोत्तरार्ध:[8] प्राय:क्षेमेन्द्रस्य काल: वर्तते।

**३"अमरचन्द्रयतिकृता-काव्यकल्पलतावृत्ति:"**

क्षेमेन्द्रोत्तर-काले त्रयोदश-शताब्द्यां अमरचन्द्रस्य कविशिक्षाविषयिणी रचना "काव्यकल्पलतावृत्ति:" उपलभ्यते। अरिसिंहकृतकवितारहस्यसूत्रोक्तमधिकमशं गृहित्वा तदुपरि वृत्तिं निर्माय सोयमरचन्द्र: काव्यकल्पलतावृत्तिमरचयत्[9]। ग्रन्थोऽयं छन्द: सिद्धि:, शब्दसिद्धि:, श्लेषसिद्धि:, अर्थसिद्धिश्चेति प्रतानेषु विभक्त: वर्तते।

---

1 पी. वी. काणे- हिस्ट्री ऑफ सं. पोएटिक्स१९६१,भाग-२ पृ०३४५।

2 ( क) काव्यालङ्कार:,४.५१, (ख)काव्यालङ्कार:,६.६४।

3 काव्यादर्श:-१.९।

4 ध्वन्यालोक: ३,७३।

5 काव्यप्रकाश:. प्रथम उल्लास० (काव्यज्ञशिक्षयाभ्यास:..)

6 आपन्नार्तिहर: पराक्रमधन: सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्त: कवीनां गुरु:
वर्ण्यं वा गुणरत्नरोहणगिरे: कि तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपति: शिष्य:रघु ग्रामणी, बा. रामा. १।१८।

7 कविकण्ठाभरणम्-श्लोक, १.३।

8 (क) राज्ये श्रीमदनन्तराजनृपते: काव्योदयोऽयं कृत:, कविकण्ठाभरणम् (ख)श्रीमदनन्तराजनृप्ते: काव्यद्योऽयं कृत: औ. वि. चर्चा,

9 काव्यकल्पलतावृत्ति: संपूर्णानन्द,पृ०१२।

**४ ”विनयचन्द्रसूरिकृता कविशिक्षा-”**

अमरचन्द्रस्य काले एव कविशिक्षामाधारीकृत्य विनयचन्द्रसूरि: “काव्यशिक्षा” इति ग्रन्थं रचितवान् [10] । ग्रन्थोऽयं शिक्षा, क्रियानिर्णय:, बीजव्यावर्णनम्, अनेकार्थशब्दसंग्रह:, रसभावनिरुपणञ्चेति पञ्चपरिच्छेदेषु निबध: वर्तते ।

**५” केशवमिश्र-प्रणीत- अलंकारशेखर:”**

षोडषशतकस्योत्तरार्धे केशवमिश्रकृतस्य अलंकार- शेखरस्य समय: वर्तते । ग्रन्थेस्मिन् द्वाविंशति: मरीचय: सन्ति, तेषु त्रयोदशमरीचे:सप्तदशमरीचिं यावत् कविशिक्षाविषयकं विवेचनं वर्तते [11] । अत: अनुषङ्गत: कविशिक्षाप्रतिपादकग्रन्थोऽयमस्ति एतदतिरिक्तोऽपि जयमंगल:[12] गंगादास:[13] राघवचैतन्य[14] -प्रभृतिराचार्यापि कविशिक्षां विषयीकृत्य ग्रन्थान् रचितवन्त: इत्यपि निर्देश: प्राप्यते ।

**” संस्कृतवाङ्मये कविशिक्षाविषयक-शोधकार्याणां सर्वेक्षणं”-**

कविशिक्षासन्दर्भितं शोधकार्यं न केवलं कविशिक्षा-ग्रन्थेषु एव दृश्यतेऽपितु विषयस्यास्य प्रसिद्धिवशात् संस्कृतवाङ्मयेपि कविशिक्षाविषक-शोधकार्याणां बाहुल्यं दृश्यते तानि कार्याणि सन्ति-

**१ कविशिक्षापरम्परासंस्कृत साहित्ये तस्यां राजशेखरस्य योगदानम् “कृष्णदेव भार्गव” निर्देशक: डॉ ०गोपाराज रामू, गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ इलाहबाद,१९९२**

सप्तध्यायात्मके शोधप्रबन्धेऽमिन् कविशिक्षाया: महत्वपूर्णा: विषया: विवेचिता: सन्ति-”अस्य भूमिकायां कविशिक्षा इति शब्दस्यार्थ:, कविशिक्षाया: उद्भव:, कविशिक्षाया:साहित्यम्, कविशिक्षाया: उपयोगिता, आचार्य- राजशेखरस्य वैशिष्ट्यम् चेत्यादया: विषया: वर्णिता: सन्ति । अस्य ग्रन्थस्य भूमिका महत्वपूर्णा वर्त्तते इत्यत्र ग्रन्थकारेण विष्णुदास- अनन्तदास- सीतारामप्रभृति- आचार्याणामुल्लेखोपि कविशिक्षाविषयक- ग्रन्थकतृषु कृत:अस्ति यद्यपि दौर्भाग्येण तेषां ग्रन्था: सम्प्रति नोपलभ्यन्ते ।

अस्य शोध-प्रबन्धस्य” प्रथमेऽध्याये”- कविस्वरूपविचार:, कविप्रतिभा, व्युत्पत्तिविचार:, तथा च ”द्वितीये अध्याये”- कवि-भेदा:विस्तरेण निरुपिता: सन्ति । ”तृतीयेअध्याये’-कवे:जीवनयात्रा ”चतुर्थेऽध्याये”’-काव्यपाकश्च वर्णितोऽस्ति । अस्य शोधप्रबन्धस्य ”पञ्चमेऽध्याये”- पदवाक्यविवेक:, काव्यपाठ:, काव्यार्थयोनयश्च प्रतिपादिता: सन्ति। षष्ठाध्याये कविचर्या, शब्दार्थहरणम्, कविसमयादिविषया: वर्तन्ते । “सप्तमेऽध्याये”- देशकालविभागानन्तरं विषयस्योपसंहतिरस्ति । तथा चान्ते परिशिष्टे ऐतिहासिक्य: टिप्पणय:,भौगोलिकस्थानानां परिचयोपि वर्तते । शोधप्रबन्धोऽयं कविशिक्षासन्दर्भित-शोधकार्येषु लाभप्रद; वर्तते ।

**२ “संस्कृत- वाङ्मये कविशिक्षा”- डॉ ० जनार्दन प्रसाद पाण्डे, वैशम्पायन प्रकाशन गोविन्दपुर इलाहवाद,२०११.** सप्तध्यायायेषु निबद्धेऽमिन् ग्रन्थे कविशिक्षाया: प्रायश: सर्वे विषया: प्रतिपादिता: सन्ति । प्रास्ताविकमिति नामके ”प्रथमेऽध्याये”- वेदकालादारभ्याधुनिकसंस्कृतसाहियत्यपर्यन्तस्य कवि-शिक्षाविषयिणीमवधारणां प्रतिपाद्य कविशिक्षाया: प्रमुख-विषयाणामाचार्याणाञ्च विषये साररुपेण ग्रन्थकारेण चर्चा कृतास्ति ।

**द्वितीयेऽध्याये-** कविप्रतिभाया: समीक्षा विद्यते इत्यत्र लेखकेन भामहत: जगन्नाथपर्यन्तानामाचार्याणां प्रतिभा-विषयकोक्तानि मतानि समीक्षितानि सन्ति । **तृतीयेऽअध्याये-** कविभेदोपभेदानामुल्लेख: वर्तते । इत्यत्र मुख्यरुपेण राजशेखर-क्षेमेन्द्र-वामनादीनामाचार्याणां मतानि विवेचितानि सन्ति ग्रन्थकारेण । चतुर्थेऽध्याये-कविसमय: वर्णितोस्ति अत्र राजशेखर-हेमचन्द्रारिसिंह-अमरचन्द्रप्रभृतिभिराचार्यै: प्रतिपादितस्य कविसमयस्य विवेचनं ग्रन्थकारेण कृतमस्ति । पञ्चमेऽध्याये-कविचर्यासमीक्षा ग्रन्थकारेण राजशेखर –क्षेमेन्द्रप्रभृति-आचार्याणां सिद्धान्तसम्मता कृतास्ति । षष्ठोऽध्यायस्तु-कविसापेक्षान्यविषयाणां वर्तते इत्यस्मिन् नवधा काव्यपाक:, काव्यपाठ:, काव्यानुहरणञ्चेत्यादय: विषया: वर्णिता: सन्ति । सप्तमेऽध्याये-विषयस्यास्य उपसंहार: विद्यते । इत्यत्रापि लेखकेन काव्ययोनय:, काव्यौचित्यम्, शब्दार्थछन्द:सिद्धयश्च इत्यादय: विषया: प्रतिपादिता: सन्ति । अत: कविशिक्षाविषयकेषु शोधकार्येषु अस्य ग्रन्थस्य महत्वपूर्णं स्थानं वर्तते ।

**३ संसकृतवाङ्मय में कवि की अवधारणा एवं अपेक्षाऍ इति एम फिल,(शोधप्रबन्ध) ”संजीव कुमार” वि० सं० अ० केन्द्र जे. एन. यू०.** लघु-शोधप्रबन्धेस्मिन् त्रय: अध्याया: सन्ति तेषु- प्रथमेऽध्याये- कविशिक्षा इति शब्दस्य व्युतपत्ति:अवधरणा, तथा च पाश्चात्यपरम्परायां कविप्रेरणासन्दर्भिता:विचारा:, काव्यसृजनम्, कविकोटयश्च, इत्यादय: शीर्षका:प्रतिपादिता: सन्ति । द्वितीयेऽअध्याये-काव्यहेतव:, कविप्रतिभा - दर्शने, व्याकरणे, काव्यशास्त्रे च प्रतिभा विचार:) व्युत्पत्तिरभ्यासश्च इत्यादय: शीर्षका: चर्चिता: वर्तन्ते । तृतीयेऽध्याये-कवि:- काव्यम् सहृदयश्च, तथा च कवे: काव्यस्य सहृदयस्यचान्तसम्बन्ध:, साधारणीकरणम्, कवि:लोकश्चेत्यादय: विषया: सन्ति ।

**संस्कृतवाड्मये एतदव्यतिरिक्तान्यापि कविशिक्षाविषयकशोधकार्याणि अधोलिखितानि सन्ति, -**

***४-कवि शिक्षा इन संस्कृत एण्ड राजशेखर कण्ट्रीव्यूशन टू इट,इति,- ”रामनिहाल शर्मा”, सागर विश्वविद्यालय, १९६३ पीएच .डी, .***

***५-कवि एण्ड कवि शिक्षा इन संस्कृत पोएटिक्स,इति,-“सुचित्रा”, कुरुक्षेत्र,पीएच. डी,१९८७.***

***६-कविशिक्षा सन्बन्धिन: साहित्यस्य संस्कृतस्य समीक्षात्मकम् अधययनम्, ”पाण्डॆ जनार्दन प्रसाद”, इलाह्बाद,पीएच. डी***

***७ –संस्कृतसाहित्य में कवि समय, इति ”रेखा अग्रवाल” नवजीवन पब्लिकेशन, निवाई राजस्थान,२०१४.***

- **कविशिक्षा ग्रन्थेषु विहित-शोधकार्याणां सर्वेक्षणम्-**
- **राजशेखरकृताया: काव्यमीमांसाया:शोधसर्वेक्षणम्-**

**कव्यमीमांसा संस्करणम्-(व्याख्याकार:)” डा० गंगासागर राय” चौखम्बा विद्याभवन वाराणसी१९७७.**

**१काव्यमीमांसा का शास्त्रीय अध्ययन, इति ”डा० उमाशंकर तिवारी” न्यू भारतीय बुक कार्पोरेशन भारत.**

सप्ताध्यायात्मकसयास्य ग्रन्थस्य प्रतिपाद्य-विषयेषु-“प्रथमेऽध्याये”- राजशेखरस्य व्यक्तित्वं कृतित्वञ्च, (सामान्यपरिचय:) वर्तते । द्वितियेऽध्याये-काव्यतत्त्वविवेचनम्, काव्यलक्षणम्, काव्यहेतु:, कव्यप्रयोजनम्, काव्यभेदा:, पदवाक्यविवेक:, रीति:वृति:प्रवृत्तयश्चेत्यादय: शीर्षका: वर्णिता: सन्ति । तृतीयेऽध्याये-कविशिक्षा-विवेचनम्, काव्यपुरुष:, कविभेदा:, काव्यपाक:, काव्यानुहरणम्, कविचर्यादिविषयेषु चर्चा विद्यते । चतुर्थेऽध्याये- काव्यशास्त्रीयप्रस्थानानि राजशेखरश्च- अत्र - रस:, अलङ्कार:, रीति:, ध्वनि:, वक्रोक्ति:,औचित्यञ्च इत्यादीनां प्रस्थानानामपि चर्चा वर्तते । पञ्चमेऽध्याये-काव्यशास्त्रे राजशेखरस्य योगदानम्, शस्त्रीयविमर्श:, काव्यपुरूषस्य प्रादुर्भाव:, अपि च रीतिवृत्तिप्रवृत्तीनां समन्वय:, काव्यार्थयोनय:, कविचर्या, कविगोष्ठी, देशकालविभागादय: विषया: वर्णिता: सन्ति षष्ठाध्याये-काव्यमीमांसायामुल्लिखितानामाचार्याणां कवीनाञ्च विषये ग्रन्थकार:चर्चितवान्-तेषु –अपराजिति:, उत्तिगर्भ:, उपवर्ष:, कौटिल्य:,गोर्नदीय:, मंगल:, व्याडिप्रभृतय: बहव: आचार्या: सन्ति येषामुल्लेखोऽत्रास्ति । सप्तमेऽध्याये-विषयस्योपसंहार: वर्तते ।

---

10 एस. के. डे,हिस्ट्री ऑफ सं. पोएटिक्स पृ० २६०तथा २८० ।

11 एस. के. डे,हिस्ट्री ऑफ सं. पोएटिकस हिन्दी अनुवाद मायाराम शर्मा, वि. हि. ग्र. अकादमी।पृ०२०४।

12 तदेव भाग १.पृ.२६५।

13 एस. के. डे, हिस्ट्री ऑफ सं. पोएटिक्स पृ. भाग १ पृ.२६०। मायाराम शर्मा कृत हिन्दी अनुवाद् में पृ०२४४ ।

14 एस. के. डे,हिस्ट्री ऑफ सं. पोएटिकस हिन्दी अनुवाद मायाराम शर्मा, वि. हि. ग्र. अकादमी पृ०२८२, भाग १।

**२ कविराजराजशेखरः- डॉ०" रमेश कुमार पाण्डेय," अमरग्रन्थ पब्लिकेशन दिल्ली,१९९८।**

ग्रन्थोऽयं सप्ताध्यायेषु निबधः वर्तते । अस्य प्रथमेऽध्याये-साहित्यशास्त्रोद्भवः क्रमिकविकासश्च, राजशेखरस्य साहित्यशास्त्रे वैशिष्ट्यमित्यादयः शीर्षका: वर्णिताः सन्ति । द्वितीयेऽध्याये- (देशकालकृतयः,) राजशेखरस्य देशः, वंशपरम्परा, कृतयश्च ततः तात्कालिकेतिहासः, सांस्कृतिक-परिस्थितयश्च निरूपिताः सन्ति । तृतीयेऽध्याये-सहित्यविद्यायाः प्रथमोपदेशकः(शिवः), साहित्यशास्त्रम्-सप्तमाङ्गम्, पञ्चमी-साहित्यविद्या, काव्यपुरूषावधारणा इत्यादयः:विषयाः विवेचिताः सन्ति । चतुर्थेऽध्याये-नाट्यसाहित्य-विमर्शेः वस्तु, पात्रं, रसः,दोषादीनाञ्च विवेचनम् ग्रन्थकारेण कृतम् । पञ्चमेऽध्याये-काव्यसिद्धान्ताः, काव्यप्रयोजनम्, काव्यात्मा, काव्यभेदाः, कविशिक्षासिद्धान्ताः, कविसमयादयः:विषयाः सन्ति । षष्ठाध्याये-राजशेखरे परिदृश्यमानः प्राक्तनग्रन्थप्रभावः, राजशेखरस्य परवर्तिषु ग्रन्थेषु परिपतितः प्रभावश्चेत्यादयः विषयाः सन्ति ।

**"काव्यमीमांसायाम्" अन्यान्यपि कानिचन शोधकार्याणि सन्ति,**

***३-अ क्रिटिकल स्टडी ऑफ राजशेखराज काव्यमीमांसा,इति, "विजयन वी० के०" कलकता, पीएच. डी, १९८८.***

***४-क्रिटिकल स्टडी ऑफ काव्यमीमांसा, इति, "मालवीय रेखा" बनारस पीएच. डी***

***५-राजशेखरकृतायाः काव्य मीमांसायाः समीक्षात्मकमध्ययनम्," जन्मेजय कुमार झा" विद्यावारिधि, श्री ला० ब० शा० रा० सं विद्यापीठ दिल्ली २०००.***

***६-काव्यमीमांसा में निरुपित कविचर्या का अध्ययन,इति,"राजकुमार मिश्र" शोध निर्देशक- डॉ० उषा चौधरी, दिल्ली विश्वविद्यालय, १९९३.***

***७- राजशेखर की काव्यमीमांसा में भाषा चिन्तन.इति, "नटवर लाल मंगलाव", शोध निर्दे०- डॉ० जे ०पी० मिश्रा, दिल्ली विश्वविद्यालय,२००३.***

***८- राजशेख़र व उनका युग, इति, " डॉ० पाण्डेय रमेश्वर प्रसाद" पटना, विहार हिन्दी ग्रन्थ अकादमी,२०००.***

**> क्षेमेन्द्रकृतकविकण्ठाभरणस्य शोध सर्वेक्षणम्"**

**> कविकण्ठाभरणम्,(मूलभागः) न्यायोपाध्याय-ढुण्ढिराजशास्त्रिणा संशोधितम्, चौ० सं० सीरिज ऑफिस बनारस,१९३३.**

**१-कविकण्ठाभरणम्,(भूमिकानुवाद, टिप्पणी, संक्षिप्त समालोचन, व सूचियों के साथ)इति (सम्पा०) "वामन केशव लेले" भारतीय भाषा विभाग काशी हिन्दू विश्वविद्यालय वाराणसी, प्रकाशक मोतीलाल बनरसीदास, १९६७।**

इत्येतस्मिन् ग्रन्थे कविशिक्षाविषये उपयोगिनी सूचना वर्तते । आदौ ग्रन्थकारेण साहित्यशास्त्रे आचार्य क्षेमेन्द्रस्य स्थानम् तेषां परिचयः क्षेमेन्द्रस्य ग्रन्थ-संपदा इत्यादयः विषयाः निरूपिताः सन्ति । ततश्च कविशिक्षाप्रतिपादकस्य साहित्यस्य कविशिक्षासन्दर्भित-ग्रन्थानाञ्च परिचयः प्रदतः । तदनु कविकण्ठाभरणस्य वैशिष्ट्यान्यपि उपपादितानि सन्ति । यतोऽपि अस्य ग्रन्थस्योपयोगिता वर्तते यत् इत्यस्मिन् प्रतिश्लोकस्य,कारिकायाः वा व्याख्याने उपयोगिनी टिप्पणी,संक्षिप्ता समालोचना च कृता वर्तते ।

**२-क्षेमेन्द्र प्रणीत कविकण्ठाभरण का समीक्षात्मक अध्ययन, इति " रूबी", निर्देशकः - डॉ ०" एम, एम. अग्रवाल" दिल्ली विश्वविद्यालय, १९९८.** लघु शोधप्रबन्धेस्मिन् त्रयः अध्यायाः सन्ति-**प्रथमेऽध्याये**-क्षेमेन्द्रस्य व्यक्तित्वं कृतित्वञ्च तथा तेषां कुल परम्परा, जन्मस्थानम्, समयः, क्षेमेन्द्रस्य कृतयश्च प्रतिपादिताः सन्ति । द्वितीयेऽध्याये-कविकण्ठाभरणस्य परिचयः, मंगलाचरणम्, अस्य ग्रन्थस्यप्रयोजनम्, ग्रन्थस्य विभाजनम्, ग्रन्थस्य वैशिष्ट्यान्युपपादितानि वर्तन्ते । तृतीयेऽध्याये-कविकण्ठाभरणस्य समीक्षास्ति अत्र कवित्वप्राप्तेरूपायाः, कविशिक्षाक्रमः, काव्यगतस्चमतकारः, गुणाः, दोषाः, विविधशास्त्राणां परिचयप्राप्तिश्चेत्यादयः विषयाः समीक्षिताःसन्ति ।

- **अमरचन्द्रयतिविरचिता "काव्यकल्पलतावृत्ति"इति ग्रन्थस्य शोधसर्वेक्षणम्।**

काव्यकल्पलतावृत्तिः,(संस्करणम्) "अमरचन्द्र-अरिसिंह",ढुण्ढिराजशास्त्री वाराणासी-१९४२।

**१ श्रीमदमरचन्द्र-विरचिता काव्यकल्पलतावृत्तिः,(संम्पादकः) डॉ०"ददन उपाध्याय" संपूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी,२००२.** अस्य ग्रन्थस्य लधुभूमिकायामपि अमरचन्द्रयतेः जीवनवृतविषयकं कविशिक्षाविषयकञ्च महत्वपूर्णं विवरणमुपभ्यते ।

**२-काव्यकल्पलतावृत्तिः का अध्ययन, इति, "शंकर नाथ तिवारी",निर्दे० डॉ ०वृजमोहन चतुर्वेदी, एवं देवेन्द्र, मिश्र, दिल्ली विश्वविद्यालय। एम, फिल,१९९७, -** शोधप्रबन्धेऽस्मिन् नव अध्यायाः सन्ति। तेषु- प्रथमेऽध्याये-सूत्रकारस्यारिसिंहस्य वृत्तिकर्तामरचन्द्रस्य च परिचयात्मकं विवरणं प्रदत्तम् । यथा-( भूमिका जीवनवृत्तं कृतित्वञ्च) अस्य द्वितीयेऽध्याये-अलंकारशास्त्रस्येतिहासिको विकासः,जैनपरम्परायाः आलंकारिकाणां च परिचयः वर्तते । यथा-आर्यरक्षितः, वाग्भट्ट प्रथमः, हेमचन्द्रः, रामचन्द्र-गुणचन्द्रः, नरेन्द्र प्रभसूरिः, अजितसेनः, वाग्भट्ट द्वितीयः, इत्यादयः। तृतीयेऽध्याये- कवेःकविशिक्षायाश्च विषयाः सन्ति । चतुर्थेऽध्याये-कविशिक्षायाःलेखकाः कव्यकल्पलतावृत्तिश्च, इत्यादिषु शीर्षेकेषु चर्चा विद्यते । पञ्चमे,षष्ठे, सप्तमेऽष्टमेऽध्याये च,क्रमात् छन्दःसिद्धिः शव्दसिद्धिःअर्थसिद्धिःश्लेषसिद्धिश्चेत्यादयः विषयाः प्रतिपादिताः सन्ति । नवमेऽध्याये चालंकार-प्रपञ्चंनिरूप्यान्ते ग्रन्थकारेण ग्रन्थस्योपसंहारःकृतः वर्तते ।

**>"अलंकारशेखरस्य शोध सर्वेक्षणम्"**

**ग्रन्थस्य संस्करणानि,-**

>"शिवदत्त तथा के पी. परव ". निर्णय सागर प्रेस मुम्बई,१८१५.

>"अनन्तराम शास्त्री वेताल", चौखम्बा संस्कृत सीरिज, बनारस,१९२७.

>"गणेश शर्मा बनारस १९५.।

> सर्वेक्षणम्

**१केशव मिश्र प्रणीतस्यालंकारशेखरस्य, समीक्षात्मकम् अध्ययम्,"जितेन्द्र कुमार दास" (विद्यावारिधि;), सदाशिव केन्द्रीय सं० विद्यापीठ पुरी ओडीशा,निर्दे०- डॉ० अद्वैत चरण दहालः.१९९२**

शोधप्रबन्धे त्रयः अध्यायाः सन्ति इत्यस्मिन् अलंकारशेखरे समागतानां सर्वेषां विषयाणां समीक्षा ग्रन्थकारेण विस्तरेण कृतास्ति । तथा चास्य द्वितीयेऽध्याये-कविशिक्षायाः विविधाः विषयाः प्रतिपादिताः सन्ति।

- **कानिचन अलंकारशेखरे विहित-शोधकार्याणि-**
  **२-अ क्रिटिकल स्टडी ऑफ केशव मिश्राज अलंकारशेखर, इति, "मंजू शर्मा" कामेश्वर सिंह संस्कृत महाविद्यालय दरभंगा, पीएच०डी,१९७६.**

**३-अ स्टडी ऑफ केशव मिश्राज अलंकार शेखर, इति "के० वी० वासुदेवन" कलकता, पीएच ० डी०१९८९.**

**४-क्रिटीकल एण्ड कम्पेरिटव स्टडी ऑफ अलंकार शेखर, इति," सन्तोष कुमार कुरुक्षेत्र,पीएच० डी १९८१।**

**>पत्र पत्रिकासु प्रकाशितानि कविशिक्षाविषयकानि शोध कार्याणि**

**१-राजशेखरीयाः काव्यशक्तिः," डॉ० रमाकान्त शुक्ल" सागरिका एकत्रिंशवर्षे प्रथमांकः,२०५०विक्रम्।**

**२-राजशेखराभिमतं काव्यस्वरूपं तदाधारश्च,"रहसविहारी द्विवेदी" सागरिका, २१.१।२०४६,१९९०।**
**३-यायावरीयः विप्रः राजशेखरः, "भास्कराचार्य त्रिपाठी" सागरिका पञ्चमोऽङ्कः।**

**४-काव्यसृजन में शास्त्र ज्ञान की अनिवार्यता, इति,कु० मन्नु आनन्द, राजस्थान, ४५तमः ऑल इण्डिया ओरिएण्टल कांफ्रेस, २०१० राष्ट्रीय संस्कृत विद्यपीठ आन्ध्र प्रदेश।**

**५- कविकण्ठाभरणे कविशिक्षा,-डॉ० मधुबाला पटना, ४५तमः ऑल इण्डिया ओरिएण्टल कांफ्रेस, २०१०। राष्ट्रीय संस्कृत विद्यपीठ आन्ध्र प्रदेश।**

**६- राजशेखरस्यान्वित प्रकृतम्" भास्कराचार्य त्रिपाठी" सागरिका पञ्चमोऽङ्कः**

**७- राजशेखरवृत्तम्, "भास्कराचार्य त्रिपाठी" सागरिका सप्तमोऽङ्कः।**

**उपसंहारः**

संस्कृत-वाङ्मये कविशिक्षा ग्रन्थेषु च यत् कविशिक्षाविषयकं शोध-सर्वेक्षणमुपलभ्यते तस्यावलोकनेन निष्कर्षोऽयं समुपागच्छति यत् कविशिक्षादृशा प्रायः राजशेखरस्य काव्यमीमांसा एव शोधकार्येषु प्रमुखा वर्तते । क्षेमेन्द्रकृते कविकण्ठाभरणे तु अद्यापि शोधकार्याणामभावः एव दृश्यते । क्षेमेन्द्रोरकालेऽपि अमरचन्द्रस्य " काव्यलल्पलावृत्तिः" विनयचन्द्रकृता-कविशिक्षा" इत्यनयोः ग्रन्थयोस्तु विहितशोधकार्याणां टीकानुवादीनाञ्च अभावः एव प्रायः दृग्गोचरीभवति । विनयचन्द्रस्य "कवि शिक्षा" इति ग्रन्थे प्रायः न दृश्यते किमपि शोध- कार्यम् । ततश्चालङ्कारशेखरे यद्यपि शोधप्रबन्धादयःउपलभ्यन्ते तथापि टीकानुवादादीनाम् अत्रापि प्रायशःअभावः एव वर्तते । कविशिक्षाविषये पत्र पत्रिकासु यत् विवरणं प्रकाशितं भवति तदपि राजशेखरस्य क्षेमेन्द्रस्य च कविशिक्षा-सिद्धान्तानाधृत्यैव दृश्यते । अत्र संभावना तु इयमपि वर्तते यत्- येषां कविशिक्षाग्रन्थकतृणां उल्लेखमात्रं प्राप्यते पर'ञ्च ग्रन्थाः नोपलभ्यन्ते तेषां (जयमंगलराघवचैतनगंगादासप्रभृतिनामाचार्याणां ग्रन्थाः रचनादयश्च च पाडुलिप्यादिषु अन्वेषणीयाः सन्ति । अनेन कार्येण कविशिक्षा विषयकं किमपि नूतनं तथ्यं नूतनां सूचना वा प्राप्तुं शक्यते । निष्कर्षतःवक्तु युज्यते यत् राजशेखरोत्तवर्ति-कविशिक्षासाहित्ये शोधकार्याणामावश्यकता उपादेयता च अद्यापि वर्तते ।

**सन्दर्भ ग्रन्थ सूची**

**मुख्य-स्रोतांसि-**

1. अलंकार शेखरः, केशव मिश्र,"शिवदत्तशास्त्री", "के० वी० परब" निर्णय सागर प्रेस मुम्बई, १८९५.
2. काव्यकल्पलतावृत्तिः, अमरचन्द्रयतिः,(सम्पा०) डॉ०"ददन उपाध्याय" सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणासी, २००२.
3. काव्यमीमांसा, राजशेखर, (व्याख्याकर्ः) डॉ०-" गंगासागर राय" चौखम्बा विद्यभवन वाराणसी,१९७७.
4. कविकण्ठाभरण, क्षेमेन्द्र, (भूमिकानुवाद, टिप्पणी व समालोचना सहित) (संपा०)"वामन केशव लेले" मोतीलाल बनारसीदास, १९६७.
5. कविशिक्षा-विनयचन्द्रसूरिकृत, डॉ०- "हरि प्रसादशास्त्री", भो० जैन अध्ययन विद्याभवन, लाल भाई दलपत भाई भारतीय संस्कृति विद्यामंदिर, अहमदावाद, १९६४(प्र० सं०).

**गौण्-स्रोतांसि**

1. अलंकार शास्त्र की परम्परा, राजवंश सहाय हीरा, चौखम्बा सुरभारती प्रकाशन वाराणसी,२००५ (पुन; मुद्रित)
2. कव्यालंकार, भामह, (भाष्यकार) देवेन्द्रनाथ शर्मा, विहार राष्ट्रभाषा परिषद पटना, विहार,२००९.
3. काव्यादर्श, दण्डी, (व्याख्याकार) जीवन्द्रविद्यासागर भट्टाचार्य, रामस्वामिशास्त्रुलु एण्ड सन्ज. मद्रास.
4. काव्यप्रकाशः, मम्मटः.(व्याख्याकार) (संपादक) डॉ० नरेन्द्र, भवन सन्त कबीर मार्ग बाराणसी, २०११.
5. काव्यमीमांसा का शास्त्रीय अध्ययन, (डॉ० उमाशंकर तिवारी, न्यू भारतीय बुक कार्पोरेशन, दिल्ली.
6. ध्वन्यालोकः, आनन्दवर्धनः, (अनुवादक) जगन्नाथ पाठक, चौ० विद्याभवन वाराणसी, १९६६.
7. पी० वी० काणे, हिष्ट्री ऑफ संस्कृत पोइटिक्स, (अनु०) इन्द्र चन्द्र शास्त्री,मोतीलाल बनारसीदास, पटना वाराणसी, १९६०. (प्र० सं०)
8. एस के डे, हिष्ट्री ऑफ संस्कृत पोइटिक्स,(अनु०) मायाराम शर्मा, विहार हिन्दी ग्रन्थ अकादमी, पटना, (प्रथम, व द्वितीय भाग )१९७३.
9. संस्कृत वाङ्मये कविशिक्षा, डा०जनार्दन प्रसाद पाण्डेय मणि;, वैशम्पायन प्रकाशन इलाहवाद,२०११.

**पत्र-पत्रिकादय**

1. सागरिका-( ५, ७, ३१.१, २७,१,) इत्याङ्का:,सागरविश्वविद्यालयः।
2. ४५-"ऑल इण्डया ओरिएण्टल कांफ्रेस, राष्ट्रीय संस्कृत विद्यापीठ तिरुपति २०१० तमे वर्षे.

**कोश ग्रन्था**

1. अमरसिंहः,अमरकोशः, निर्णय सगर प्रेस मुम्बाई,१९६१.
2. २-आप्टे बामन शिवराम,हिन्दी संस्कृत कोश, मोतीलाल वनारसीदास वाराणसी, दिल्ली, पटना.१९६९.(द्वितीय सं०
3. भारतीय साहित्य शास्त्र कोश, राजवंश सहाय हीरा, विहार हिन्दी ग्रन्थ अकादमी, पटना, 1973.